# Brahmaproktam Vishnumahimavarnanam

# ब्रह्मप्रोक्तं विष्णुमहिमावर्णनम्

## Document Information

Text title : Brahmaproktam Vishnumahimavarnanam

File name : brahmaproktaMviShNumahimAvarNanam.itx

Category : vishhnu, vishnu, brahmavaivartapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | brahmakhaNDa | adhyAya 17/14-21||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 5, 2025

*sanskritdocuments.org*

# ब्रह्मप्रोक्तं विष्णुमहिमावर्णनम्

ब्रह्मोवाच ।
नागतो हरिरत्रेति त्वया यत्कथितं द्विज ।
हरिः सर्वत्र सर्वात्मा विग्रहः कुत आत्मनः ॥ १४॥

स्वेच्छामयः परं ब्रह्म भक्तानुग्रहविग्रहः ।
सर्वं पश्यति सर्वज्ञः सर्वत्रास्ति सनातनः ॥ १५॥

विषिश्च व्याप्तिवचनो नुश्च सर्वत्रवाचकः ।
सर्वव्यापी च सर्वात्मा तेन विष्णुः प्रकीर्त्तितः ॥ १६॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ १७॥

कर्मारम्भे च मध्ये वा शेषे विष्णुं च यः स्मरेत् ।
परिपूर्णं तस्य कर्म वैदिकं च भवेद्विज ॥ १८॥

अहं स्रष्टा च जगतां विधाता संहरो हरः ।
धर्मश्च कर्मणां साक्षी यस्याज्ञापरिपालकः ॥ १९॥

कालः संहरते लोकान्यमः शास्ता च पापिनाम् ।
उपैति मृत्युः सर्वांश्च भिया यस्याज्ञया सदा ॥ २०॥

सर्वेशा या च सर्वाद्या प्रकृतिः सर्वसूः पुरा ।
सा भीता यस्य पुरतो यस्याज्ञापरिपालिका ॥ २१॥

इति ब्रह्मवैवर्तपहराणे ब्रह्मखण्डे सप्तदशाध्यायान्तर्गतं
ब्रह्मप्रोक्तं विष्णुमहिमावर्णनं समाप्तम् ।

ब्रह्मवैवर्तपुराण । ब्रह्मखण्ड । अध्याय १७/१४-२१ ॥

brahmavaivartapurANa . brahmakhaNDa . adhyAya 17/14-21..

Proofread by PSA Easwaran

*Brahmaproktam Vishnumahimavarnanam*
pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*